# ShivapanchakSharanakShatra Stotra

# શ્રીશિવપઞ્ચાક્ષરનક્ષત્રમાલાસ્તોત્રમ્

## Document Information

Text title : shivapanchAkSharanakShatramAlAstotram

File name : shiva5nakshatra.itx

Category : panchaka, shiva, shankarAchArya

Location : doc_shiva

Author : Adi Shankaracharya

Transliterated by : Sridhar Seshagiri

Proofread by : Sridhar Seshagiri

Latest update : July 29, 2000

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 1, 2021

*sanskritdocuments.org*

# શ્રીશિવપઞ્ચાક્ષરનક્ષત્રમાલાસ્તોત્રમ્

શ્રીમદાત્મને ગુણૈકસિન્ધવે નમઃ શિવાય
ધામલેશધૂતકોકબન્ધવે નમઃ શિવાય ।
નામશેષિતાનમદ્ભાવાન્ધવે નમઃ શિવાય
પામરેતરપ્રધાનબન્ધવે નમઃ શિવાય ॥ ૧॥

કાલભીતવિપ્રબાલપાલ તે નમઃ શિવાય
શૂલભિન્નદુષ્ટદક્ષફાલ તે નમઃ શિવાય ।
મૂલકારણાય કાલકાલ તે નમઃ શિવાય
પાલયાધુના દયાલવાલ તે નમઃ શિવાય ॥ ૨॥

ઇષ્ટવસ્તુમુખ્યદાનહેતવે નમઃ શિવાય
દુષ્ટદૈત્યવંશધૂમકેતવે નમઃ શિવાય ।
સૃષ્ટિરક્ષણાય ધર્મસેતવે નમઃ શિવાય
અષ્ટમૂર્તયે વૃષેન્દ્રકેતવે નમઃ શિવાય ॥ ૩॥

આપદદ્રિભેદટઙ્કહસ્ત તે નમઃ શિવાય
પાપહારિદિવ્યસિન્ધુમસ્ત તે નમઃ શિવાય ।
પાપદારિણે લસન્નમસ્તતે નમઃ શિવાય
શાપદોષખણ્ડનપ્રશસ્ત તે નમઃ શિવાય ॥ ૪॥

વ્યોમકેશ દિવ્યભવ્યરૂપ તે નમઃ શિવાય
હેમમેદિનીધરેન્દ્રચાપ તે નમઃ શિવાય ।
નામમાત્રદગ્ધસર્વપાપ તે નમઃ શિવાય
કામનૈકતાનહૃદ્દુરાપ તે નમઃ શિવાય ॥ ૫॥

બ્રહ્મમસ્તકાવલીનિબદ્ધ તે નમઃ શિવાય
જિહ્મગેન્દ્રકુણ્ડલપ્રસિદ્ધ તે નમઃ શિવાય ।
બ્રહ્મણે પ્રણીતવેદપદ્ધતે નમઃ શિવાય
જિંહકાલદેહદત્તપદ્ધતે નમઃ શિવાય ॥ ૬॥

કામનાશનાય શુદ્ધકર્મણે નમઃ શિવાય
સામગાનજાયમાનશર્મણે નમઃ શિવાય ।
હેમકાન્તિચાકચક્યવર્મણે નમઃ શિવાય
સામજાસુરાઙ્ગલબ્ધચર્મણે નમઃ શિવાય ॥ ૭॥

જન્મમૃત્યુઘોરદુઃખહારિણે નમઃ શિવાય
ચિન્મયૈકરૂપદેહધારિણે નમઃ શિવાય ।
મન્મનોરથાવપૂર્તિકારિણે નમઃ શિવાય
સન્મનોગતાય કામવૈરિણે નમઃ શિવાય ॥ ૮॥

યક્ષરાજબન્ધવે દયાલવે નમઃ શિવાય
દક્ષપાણિશોભિકાઞ્ચનાલવે નમઃ શિવાય ।
પક્ષિરાજવાહહૃચ્છયાલવે નમઃ શિવાય
અક્ષિફાલ વેદપૂતતાલવે નમઃ શિવાય ॥ ૯॥

દક્ષહસ્તનિષ્ઠજાતવેદસે નમઃ શિવાય
અક્ષરાત્મને નમદ્બિડૌજસે નમઃ શિવાય ।
દીક્ષિતપ્રકાશિતાત્મતેજસે નમઃ શિવાય
ઉક્ષરાજવાહ તે સતાં ગતે નમઃ શિવાય ॥ ૧૦॥

રાજતાચલેન્દ્રસાનુવાસિને નમઃ શિવાય
રાજમાનનિત્યમન્દહાસિને નમઃ શિવાય ।
રાજકોરકાવતંસભાસિને નમઃ શિવાય
રાજરાજમિત્રતાપ્રકાશિને નમઃ શિવાય ॥ ૧૧॥

દીનમાનવાલિકામધેનવે નમઃ શિવાય
સૂનબાણદાહકૃત્કૃશાનવે નમઃ શિવાય ।
સ્વાનુરાગભક્તરત્નસાનવે નમઃ શિવાય
દાનવાન્ધકારચણ્ડભાનવે નમઃ શિવાય ॥ ૧૨॥

સર્વમઙ્ગલાકુચાગ્રશાયિને નમઃ શિવાય
સર્વદેવતાગણાતિશાયિને નમઃ શિવાય ।
પૂર્વદેવનાશસંવિધાયિને નમઃ શિવાય
સર્વમન્મનોજભઙ્ગદાયિને નમઃ શિવાય ॥ ૧૩॥

સ્તોકભક્તિતોઽપિ ભક્તપોષિણે નમઃ શિવાય

માકરન્દસારવર્ષિભાષિણે નમઃ શિવાય ।
એકબિલ્વદાનતોઽપિ તોષિણે નમઃ શિવાય
નૈકજન્મપાપજાલશોષિણે નમઃ શિવાય ॥ ૧૪॥

સર્વજીવરક્ષણૈકશીલિને નમઃ શિવાય
પાર્વતીપ્રિયાય ભક્તપાલિને નમઃ શિવાય ।
દુર્વિદગ્ધદૈત્યસૈન્યદારિણે નમઃ શિવાય
શર્વરીશધારિણે કપાલિને નમઃ શિવાય ॥ ૧૫॥

પાહિ મામુમામનોજ્ઞદેહ તે નમઃ શિવાય
દેહિ મે વરં સિતાદ્રિગેહ તે નમઃ શિવાય ।
મોહિતર્ષિકામિનીસમૂહ તે નમઃ શિવાય
સ્વેહિતપ્રસન્ન કામદોહ તે નમઃ શિવાય ॥ ૧૬॥

મઙ્ગલપ્રદાય ગોતુરંગ તે નમઃ શિવાય
ગઙ્ગયા તરઙ્ગિતોત્તમાઙ્ગ તે નમઃ શિવાય ।
સઙ્ગરપ્રવૃત્તવૈરિભઙ્ગ તે નમઃ શિવાય
અઙ્ગજારયે કરેકુરઙ્ગ તે નમઃ શિવાય ॥ ૧૭॥

ઈહિતક્ષણપ્રદાનહેતવે નમઃ શિવાય
આહિતાગ્નિપાલકોક્ષકેતવે નમઃ શિવાય ।
દેહકાન્તિધૂતરૌપ્યધાતવે નમઃ શિવાય
ગેહદુઃખપુઞ્જધૂમકેતવે નમઃ શિવાય ॥ ૧૮॥

ત્ર્યક્ષ દીનસત્કૃપાકટાક્ષ તે નમઃ શિવાય
દક્ષસપ્તતન્તુનાશદક્ષ તે નમઃ શિવાય ।
ઋક્ષરાજભાનુપાવકાક્ષ તે નમઃ શિવાય
રક્ષ માં પ્રપન્નમાત્રરક્ષ તે નમઃ શિવાય ॥ ૧૯॥

ન્યઙ્કુપાણયે શિવંકરાય તે નમઃ શિવાય
સંકટાબ્ધિતીર્ણકિંકરાય તે નમઃ શિવાય ।
કઙ્કુભીષિતાભયંકરાય તે નમઃ શિવાય
પઙ્કુજાનનાય શંકરાય તે નમઃ શિવાય ॥ ૨૦॥

કર્મપાશનાશ નીલકણ્ઠ તે નમઃ શિવાય
શર્મદાય નર્યભસ્મકણ્ઠ તે નમઃ શિવાય ।
નિર્મમર્ષિસેવિતોપકણ્ઠ તે નમઃ શિવાય

કુર્મહે નતીર્નમદ્વિકુણ્ઠ તે નમઃ શિવાય ॥ ૨૧॥

વિષ્ટપાધિપાય નમ્રવિષ્ણવે નમઃ શિવાય
શિષ્ટવિપ્રહૃદ્ગુહાચરિષ્ણવે નમઃ શિવાય ।
ઇષ્ટવસ્તુનિત્યતુષ્ટજિષ્ણવે નમઃ શિવાય
કષ્ટનાશનાય લોકજિષ્ણવે નમઃ શિવાય ॥ ૨૨॥

અપ્રમેયદિવ્યસુપ્રભાવ તે નમઃ શિવાય
સત્પ્રપન્નરક્ષણસ્વભાવ તે નમઃ શિવાય ।
સ્વપ્રકાશ નિસ્તુલાનુભાવ તે નમઃ શિવાય
વિપ્રડિમ્ભદર્શિતાર્દ્રભાવ તે નમઃ શિવાય ॥ ૨૩॥

સેવકાય મે મૃડ પ્રસીદ તે નમઃ શિવાય
ભાવલભ્ય તાવકપ્રસાદ તે નમઃ શિવાય ।
પાવકાક્ષ દેવપૂજ્યપાદ તે નમઃ શિવાય
તવકાઙ્ઘ્રિભક્તદત્તમોદ તે નમઃ શિવાય ॥ ૨૪॥

ભુક્તિમુક્તિદિવ્યભોગદાયિને નમઃ શિવાય
શક્તિકલ્પિતપ્રપઞ્ચભાગિને નમઃ શિવાય ।
ભક્તસંકટાપહારયોગિને નમઃ શિવાય
યુક્તસન્મનઃસરોજયોગિને નમઃ શિવાય ॥ ૨૫॥

અન્તકાન્તકાય પાપહારિણે નમઃ શિવાય
શાન્તમાયદન્તિચર્મધારિણે નમઃ શિવાય ।
સંતતાશ્રિતવ્યથાવિદારિણે નમઃ શિવાય
જન્તુજાતનિત્યસૌખ્યકારિણે નમઃ શિવાય ॥ ૨૬॥

શૂલિને નમો નમઃ કપાલિને નમઃ શિવાય
પાલિને વિરિઞ્ચિતુણ્ડમાલિને નમઃ શિવાય ।
લીલિને વિશેષરુણ્ડમાલિને નમઃ શિવાય
શીલિને નમઃ પ્રપુણ્યશાલિને નમઃ શિવાય ॥ ૨૭॥

શિવપઞ્ચાક્ષરમુદ્રાં
ચતુષ્પદોલ્લાસપદ્યમણિઘટિતામ્ ।
નક્ષત્રમાલિકામિહ
દધદુપકણ્ઠં નરો ભવેત્સોમઃ ॥ ૨૮॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છંકરભગવતઃ કૃતૌ
શિવપઞ્ચાક્ષરનક્ષત્રમાલાસ્તોત્રં સંપૂર્ણમ્ ॥

Encoded by Sridhar-Seshagiri seshagir at engineering.sdsu.edu

---

*ShivapanchakSharanakShatra Stotra*

pdf was typeset on August 1, 2021

Please send corrections to *sanskrit@cheerful.com*